# jayAdityastotram or jayAdityAShTakam

# જયાદિત્યસ્તોત્રમ્ અથવા જયાદિત્યાષ્ટકમ્

## Document Information

Text title : jayAdityastotramskandapurANa

File name : jayAdityastotramskandapurANa.itx

Category : navagraha, aShTaka

Location : doc_z_misc_navagraha

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : Skandamahapurna Maheshvarakhanda Kaumarikakhanda Adhyaya 51, verses 65-90

Latest update : February 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 20, 2021

*sanskritdocuments.org*

# જયાદિત્યસ્તોત્રમ્ અથવા જયાદિત્યાષ્ટકમ્

ન ત્વં કૃતઃ કેવલસંશ્રુતશ્ચ યજુષ્યેવં વ્યાહરત્યાદિદેવ! ।
ચતુર્વિધા ભારતી દૂરદૂરં ધૃષ્ટઃ સ્તૌમિ સ્વાર્થકામઃ ક્ષમૈતત્ ॥ ૧॥

માર્તણ્ડસૂર્યાંશુરવિસ્તથેન્દ્રો ભાનુર્ભગશ્ચાઽર્યમા સ્વર્ણરેતાઃ ॥ ૨॥

દિવાકરો મિત્રવિષ્ણુશ્ચ દેવ! ખ્યાતસ્ત્વં વૈ દ્વાદશાત્મા નમસ્તે ।
લોકત્રયં વૈ તવ ગર્ભગેહં જલાધારઃ પ્રોચ્યસે ખં સમગ્રમ્ ॥ ૩॥

નક્ષત્રમાલા કુસુમાભિમાલા તસ્મૈ નમો વ્યોમલિઙ્ગાય તુભ્યમ્ ॥ ૪॥

ત્વં દેવદેવસ્ત્વમનાથનાથસ્ત્વં પ્રાપ્યપાલઃ કૃપણે કૃપાલુઃ ।
ત્વં નેત્રનેત્રં જનબુદ્ધિબુદ્ધિરાકાશકાશો જય જીવજીવઃ ॥ ૫॥

દારિદ્ર્યદારિદ્ર્ય નિધે નિધીનામમઙ્ગલામઙ્ગલ શર્મશર્મ ।
રોગપ્રરોગઃ પ્રથિતઃ પૃથિવ્યાં ચિરં જયાઽઽદિત્ય! જયાઽઽપ્રમેય! ॥ ૬॥

વ્યાધિગ્રસ્તં કુષ્ઠરોગાભિભૂતં ભગ્નઘ્રાણં શીર્ણદેહં વિસંજ્ઞમ્ ।
માતા પિતા બાન્ધવાઃ સન્ત્યજન્તિ સર્વૈસ્ત્યક્તં પાસિ કોઽસ્તિ ત્વદન્યઃ ॥ ૭॥

ત્વં મે પિતા ત્વં જનની ત્વમેવ ત્વં મે ગુરુર્બાન્ધવાશ્ચ ત્વમેવ ।
ત્વં મે ધર્મસ્ત્વઞ્ચ મે મોક્ષમાર્ગો દાસસ્તુભ્યં ત્યજ વા રક્ષ દેવ! ॥ ૮॥

પાપોઽસ્મિ મૂઢોઽસ્મિ મહોગ્રકર્મા રૌદ્રોઽસ્મિ નાઽઽચારનિધાનમસ્મિ ।
તથાપિ તુભ્યં પ્રણિપત્ય પાદયોર્જયં ભક્તાનામર્પયં શ્રીજયાર્ક! ॥ ૯॥

ફલશ્રુતિઃ

નારદ ઉવાચ-
એવં સ્તુતો જયાદિત્યઃ કમઠેન મહાત્મના ।
સ્નિગ્ધગમ્ભીરયાવાચા પ્રાહ તં પ્રહસન્નિવ ॥ ૧૦॥

જયાદિત્યાષ્ટકમિદં યત્ત્વયા પરિકીર્તિતમ્ ।
અનેનસ્તોષ્યતે યો મામ્ભુવિ તસ્ય ન દુર્લભમ્ ॥ ૧૧॥

રવિવારે વિશેષેણ માં સમભ્યર્ચ્ય યઃ પઠેત્ ।
તસ્ય રોગાનશિષ્યન્તિ દારિદ્ર્યઞ્ચ ન સંશયઃ ॥ ૧૨॥

ત્વયા ચ તોષિતોવત્સતવદદ્મિવરન્ત્વમુમ્ ।
સર્વજ્ઞો ભુવિ ભૂત્વા ત્વં તતો મુક્તિમવાપ્સ્યસિ ॥ ૧૩॥

ત્વત્પિતા સ્મૃતિકારશ્ચ ભવિષ્યતિ દ્વિજાર્ચિતઃ ।
સ્થાનસ્યાऽસ્ય ન નાશશ્ચ કદાચિત્પ્રભવિષ્યતિ ॥ ૧૪॥

ન ચૈતત્સ્થાનકં વત્સ પરિત્યક્ષ્યામિ કર્હિચિત્ ।
એવમુક્ત્વા સ ભગવાન્બ્રાહ્મણૈરર્ચિતઃ સ્તુતઃ ॥ ૧૫॥

અનુજ્ઞાપ્ય દ્વિજેન્દ્રાંસ્તાંસ્તત્રૈવાऽન્તર્દધે પ્રભુઃ ।
એવં પાર્થ સમુત્પન્નો જયાદિત્યોऽત્ર ભૂતલે ॥ ૧૬॥

આશ્વિને માસિ સમ્પ્રાપ્તે રવિવારે ચ સુવ્રત!
આશ્વિને ભાનુવારેણ યો જયાદિત્યમર્ચયેત્ ॥ ૧૭॥

કોટિતીર્થે નરઃ સ્નાત્વા બ્રહ્મહત્યાં વ્યપોહતિ ।
પૂજનાદ્રક્તમાલ્યૈશ્ચ રક્તચન્દનકુઙ્કુમૈઃ ॥ ૧૮॥

લેપનાદ્ગન્ધધૂપાદ્યૈર્નૈવેદ્યૈર્ઘૃતપાયસૈઃ ।
બ્રહ્મઘ્નશ્ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ ॥ ૧૯॥

મુચ્યતે સર્વપાપેભ્યઃ સૂર્યલોકઞ્ચ ગચ્છતિ ।
પુત્રદારધનાન્યાયુઃ પ્રાપ્ય સાંસારિકં સુખમ્ ॥ ૨૦॥

ઇષ્ટકામૈઃ સમાયુક્તઃ સૂર્યલોકે ચિરં વસેત્ ॥ ૨૧॥

સર્વેષુ રવિવારેષુ જયાદિત્યસ્ય દર્શનમ્ ।
કીર્તનં સ્મરણં વાપિ સર્વરોગોપશાન્તિકમ્ ॥ ૨૨॥

અનાદિનિધનં દેવમવ્યક્તં તેજસાન્નિધિમ્ ।
યે ભક્તાસ્તે ચ લીયન્તે સૌરસ્થાને નિરામયે ॥ ૨૩॥

સૂર્યોપરાગે સમ્પ્રાપ્તે રવિકૂપે સમાહિતઃ ।
સ્નાનં યઃ કુરુતે પાર્થ હોમં કુર્યાત્પ્રયત્નતઃ ॥ ૨૪॥

દાનં ચૈવ યથાશક્ત્યા જયાદિત્યાગ્રતઃસ્થિતઃ ।
તસ્ય પુણ્યસ્ય માહાત્મ્યં શ્રુણુષ્વૈકમનાજય ॥ ૨૫॥

કુરુક્ષેત્રેષુ યત્પુણ્યં પ્રભાસે પુષ્કરેષુ ચ ।
વારાણસ્યાઞ્ચ યત્પુણ્યં પ્રયાગે નૈમિષેઽપિ વા ।
તત્પુણ્યં લભતે મર્ત્યો જયાદિત્યપ્રસાદતઃ ॥ ૨૬॥

ઇતિ શ્રીસ્કાન્દે મહાપુરાણે એકાશીતિસાહસ્ર્યાં સંહિતાયાં
પ્રથમે માહેશ્વરખણ્ડે કૌમારિકાખણ્ડે
જયાદિત્યમાહાત્મ્યવર્ણનનામૈકપઞ્ચાશત્તમોઽધ્યાયે
જયાદિત્યાષ્ટકમ્ ॥ ૧॥

Skandamahapurna Maheshvarakhanda Kaumarikakhanda Adhyaya 51, verses 65-90

Encoded and proofread by Sunder Hattangadi

---

*jayAdityastotram or jayAdityAShTakam*
pdf was typeset on February 20, 2021

Please send corrections to *sanskrit@cheerful.com*